This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

६३,६४,६५,६६

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

वर्गांक पूजाविधी
दाखल क्र. ६३
नांव - अर्घ्य विधी
लेखक/लिपीकार ? पृष्ठ १२
काळ ? पूर्ण/~~अपूर्ण~~

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

वर्गांक धर्मशास्त्र
दाखल क्र. ६४
नांव - जातकर्म विधी
लेखक/लिपीकार ? पृष्ठ ३
काळ ? पूर्ण/~~अपूर्ण~~

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

वर्गांक वेद
दाखल क्र. ६५
नांव - ऐतरेय ब्राह्मण
लेखक/लिपीकार ? पृष्ठ ६
काळ ? पूर्ण/~~अपूर्ण~~

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय
ग्रंथालय, रामटेक

हस्तलिखित संग्रह

वर्गांक पुराण
दाखल क्र. ६६
नांव - कपिलगीता (पद्मपुराण)
लेखक/लिपीकार ? पृष्ठ ६
काळ ? पूर्ण/~~अपूर्ण~~

कपि॰

गीता

श्रीगणेशायनमः॥कपिलगीता॥ॐविहंगवाहनेयस्यविकचायस्य
भूषणं॥सालपावामभागेश्चसदैवःशरणंमम॥१॥परिक्षितिश्चश्र
वणेकीर्तनेनारदस्तुकः॥स्मरणेद्विवप्रल्हादंलक्ष्मीश्चपादसेवने॥
॥२॥अर्चनेपूजनेध्यानेपृथुराजादिकंस्मृतं॥वंदनेईश्रामक्रूरंदास्य
तार्क्षहनुमंत॥३॥सख्यंसुग्रीवचार्जुनंबलिवात्मनिवेदनं॥भक्तिने
वविधांकृत्वाकैवल्यंप्राप्यतेपरं॥४॥श्रवणंकीर्तनेविष्णोःस्मरणंपाद
सेवनं॥अर्चनेवंदनंदास्यंसख्यंआत्मनिवेदनं॥५॥वेदांतन्यायमी
मांसातर्केनेय्यायिकंतथा॥चार्वाक्यादीनिशास्त्राणिषट्दर्शनमि
तिस्मृतं॥६॥कापालिकेकजैनेकजंगमंब्राह्मणंतथा॥संन्यासीच
तथासोपिषट्दर्शनमितिस्मृतं॥७॥शैवाशाक्तोस्तथासौरागाण
पत्यास्तथैवच॥जैनंनवैष्णवंप्रोक्तंषट्दर्शनमितिस्मृतं॥८॥हस्त

पवित्रं यदि दानपुण्यं पादं पवित्रं यदि तीर्थयात्रा ॥ वाक्यं पवित्रं यदि
रामनाम हृदं पवित्रं यदि ब्रह्मनिष्ठा ॥ ९ ॥ ज्ञानं विरागो नियमो य
मश्च सत्या ध्याय वर्णाश्रमधर्मकर्म ॥ भक्तिपरेवास्य स्वतानुभावो
मोक्षस्य मार्गं प्रवदंति संतः ॥ १० ॥ शैवाः पाशुपता महाव्रतधरा
कालामुखा जंगमा शाक्ताः कौलकुलार्चनरता कापालिकाश्चा भ
वाः ॥ यज्ञाः हास्यविमंत्रतंत्रनिरतास्तवं ततां वृचितास्तेषां स्वल्प
मिहकर्मवहिफलं सत्यं न मोक्षापरं ॥ ११ ॥ चार्वाकाश्चतुरास्वध
र्मनिपुणा देहात्मवादे रता [illegible]नानात्वेकुतर्कभावरहिता निष्ठा
परं तार्किका ॥ वेदार्थः प्रतिपादका सकुवालाकर्त्तेति नैयायिका
स्तेषां स्वल्पफलं भवंति सततं सत्यं न मोक्षापरं ॥ १२ ॥ कर्माकर्म

क॰पि॰

गीता

विकर्मबोधजनकाः कर्मार्थमीमांसकाः सांख्या सागपरा सवेदवि
दुषा संन्यासिना स्नातकेः ॥ योगी गाष्टसुबोधका प्रतिभटा पातं
जला न्यायका योगज्ञानमिदं प्रबोधजनका सत्यं न मोक्षापरं ॥ १३ ॥
वेदांता बहुतर्ककर्कशमति श्वाद्वैतसंबोधका नानाविवाद विवादज्ञा
ननिपुणा विज्ञानबोधात्मका ॥ कर्त्तारं प्रभजंति तथैव यवनापामे
रता निर्दया विप्रा वेदरतासमतेनिरता सत्यं न मोक्षापरं ॥ १४ ॥
श्रुत्यार्थप्रतिपादका लघुगुरु बोधांजनाश्रावका नानातीर्थनि
क्षेत्रकाः प्रतिपरास्मृत्यर्थसंबोधका ॥ तुंडातुंडवितंडजल्पनम
हाभेदास्पदा वैष्णवाः सर्वे वै प्रवदंति दुःसहतरं सत्यं न मोक्षाप
रं ॥ १५ ॥ प्राणापाननिरोधनार्थनिरतासंस्थापवैशेषिका वायुः

पूरकं कुंभकं प्राप्ति दिने तद्रेचकं त्राटकं ॥ जिह्वां दोहनकं कारकासुरसमि
कालं बायमालेविका योगांगानि विभूषितां चैव संततं सत्येन मोक्षपदं
॥१६॥ यं त्रैकालं समुपासते त्रिविधं इति ब्रह्मेति वेदांतिनो बौद्धा बुद्ध इति प्र
माणपठवः कर्तेति नैयायिकाः ॥ अर्हन्नित्यथ जैनशासनरताः कर्मेति
मिमांसकाचार्यायाविद धातु वांछितफलं सत्येन मोक्षापदं ॥१७॥ सो
रा सूर्यमुपासनं च संततं स्त्रात्कं चक्रांकितं तथा गाणपत्यपदं गणेशाभ
जनं विष्णु भजेद्दृढं ॥ शैवानां शिवपूजनं परमकं विप्रं च सर्वात्मकं ना
नादेवतं वांछितार्थवरदं सत्येन मोक्षापदं ॥१८॥ नाना विचित्र विचित्र
वेषरचिता नानामतं श्रामकाः नानातीर्थसेवकाः जपपरामौना स्थिता
नियताः ॥ सर्वेचारे देपाषणास्वभिमतावादासक्तितावादरः ॥ ज्ञाने

मोक्षपदं वदंति मुनयः स्तस्याप्य सादुर्लभः ॥१९॥ ज्ञानमात्रेण मुच्य
ते नानासाधनवर्जितं ॥ साक्षात्कारपदं ज्ञानं प्राप्यते गुरुराज्ञया ॥२०॥
ज्ञाप्यतानंदशांतिलं पूर्णरूपं स्वरूपकं ॥ तुष्टं वे अचलं हं चषडैश्व
र्यादि प्राप्यते ॥२१॥ ऋषिसिद्ध उवाच ॥ जलैः स्नानं बहिः शुद्धिमंतः
शुद्धि कथं भवेत् ॥ योगिनां तु कृतां स्नानं कपालैः कपिलो वद ॥२२॥
श्रीकपिल उवाच ॥ वामनासापुटे इडा दक्षिणे सापुटे पिंगला ॥ गां
धारी कर्णवामे च हस्तिनी कर्णदक्षिणे ॥२३॥ वामचक्षु सुखा नाडीलि
बुसा च क्षुर्दक्षिणे ॥ सुषुम्ना अंगदा प्रोक्ता जिह्वाग्रे च सरस्वती ॥२४॥
कुहू गुदस्य संप्रोक्ता शंखिनी लिंगमिंद्रिया ॥ वारुणी मूत्रद्वारश्च स
र्वांगे सुपयस्विनी ॥२५॥ इति नाडी नदी प्रोक्ता शरीरे च व्यवस्थिता ॥

व्यापितद्ब्रह्मद्वारेतुचराचरंकरोतिच ॥ २६ ॥ इडाभागीरथीगंगापिंग
लायमुनानदी ॥ सुषुम्नानाडीकाप्रोक्ताब्रह्मावेणीसरस्वती ॥ २७ ॥ कु
हूचनर्मदायनातापिनीशंखिनीतथा ॥ गांधारीनाडीकावेरीवारुणी
गोमतीतथा ॥ २८ ॥ ताम्रपर्णीपूषानाडीसिंधुनदीवहस्तिनी ॥ गो
तमीलंबुषाचैवपूर्णापूर्णपयस्विनी ॥ २९ ॥ उहिनाडीनदीप्रोक्ता
३ शरीरेवसतेसदा ॥ पवनंचतुरीपंचसर्वतस्नानमुच्यते ॥ ३० ॥ गं ३
गायमुनयोर्मध्येबालरंडातपस्विनी ॥ बलात्कारेणगृह्णीयात्त
द्विष्णोःपरमंपदं ॥ ३१ ॥ जलस्नानंमलत्यागं भस्मस्नानंबहिः
शुचिः ॥ अंतःशुचिर्मंत्रस्नानेज्ञानेस्नानंपरंपदं ॥ ३२ ॥ अंतस्ना
नविहीनस्यबहिस्नानेनकिंफलं ॥ मलयाचलसंभूतेनवेणुश्चंदना

क॰पि॰ गीता

यते ॥ ३३ ॥ मंत्रस्नानेमनोशुद्धःसाचेतःशुद्धमाप्नुयात् ॥ अंतर्बहि
श्चशुध्यर्थंज्ञानस्नानंचमोक्षदं ॥ ३४ ॥ वटबीजेचसूक्ष्मेपिमहाव
टतरुर्यथा ॥ यदास्तिसर्वेतावद्वृक्षाकृतआयातत्तद्दृ ॥ ३५ ॥ तथाभ्य
भ्यंतरंशुद्धंबहिःशुद्धंत्वलक्षणात् ॥ बीजवृक्षादिन्यायेनसर्वेष्वे
कोशुचिर्भवेत् ॥ ३६ ॥ नैकतत्त्वेस्वरूपंचउत्पन्नेज्ञानमज्ञसी ॥ अहं
ममेतिचाज्ञानेभ्रमंतिहिभ्रमोयथा ॥ ३७ ॥ दुर्लभोविषयत्यागेदुर्ल
भंतत्त्वदर्शनं ॥ दुर्लभंसहजावस्थासद्गुरोःकरुणांविना ॥ ३८ ॥ ऋषि
सिद्धउवाच ॥ कथंभगवतोज्ञानंशुद्धमर्त्यस्यजायते ॥ तत्रोपायमु
नेब्रूहिममानुग्रहकारिणी ॥ ३९ ॥ श्रीकपिलउवाच ॥ जाग्रत्स्वप्नसु
षुप्त्यादिप्रपंचोयत्प्रकाशितः ॥ तद्ब्रह्माहमितिज्ञात्वासर्वबंधैःप्रमु

अतः
४

च्यते ॥४०॥ त्रिषुधामसुयद्भोग्यंभोक्ताभोग्यश्चयद्भवेत् ॥ तेभ्योविल
क्षणः साक्षिचिन्मात्रोहंसदाशिवः ॥४१॥ एकोदेवः सर्वभूतेषुगूढः
सर्वव्यापीसर्वभूतांतरात्मा ॥ सर्वाध्यक्षः सर्वभूतानिवासः साक्षि
चेतः केवलोनिर्गुणश्च ॥४२॥ पिंगलाद्वादशासूर्येइडाचंद्रेतुषो
डशाः ॥ कर्मपंचैवप्राणंचपंचकंतथा ॥४३॥ ज्ञानेंद्रियंचपंचैवक
र्मेंद्रियंचकंतथा ॥ विषयंपंचकंयेनविकल्पंपंचउच्यते ॥४४॥ वि
कारंषडभिस्तेनदेहस्यात्मप्रवर्त्तते ॥ उयेवंगुणसर्वत्रकलाकाष्टा
चतुर्थकं ॥४५॥ युक्तंगुडवार्करेणश्रीगंधेनसुवासितं ॥ क्षीरेण
माज्यप्राप्तव्यंतिलेतैलंतथात्मनः ॥४६॥ साधनेनविनाप्राप्तं
गुरुवाक्येननिश्चितं ॥ स्वात्मानंहृद्विपद्धेषुप्रकाशंज्योतिरूपकं
त्मा
॥४७॥

४

पि०

गीता

प्रथमंतुशिरापद्मेनेत्रपद्मेद्वितीयकं ॥ तृतीयेवदनंपद्मेमुखपद्मेच
तुर्थकं ॥४८॥ पंचमंकरपद्मेचषष्ठंचरणपंकजे ॥ सप्तमेनाभिपद्मेच
अष्टमेहृद्विपंकजे ॥४९॥ अष्टपद्मासनंपद्मेसूक्ष्मंहृदयपंकजे ॥
चक्रातीतपरंस्थानेसूक्ष्ममोंकारसंज्ञिके ॥५०॥ हृत्पद्मकर्णिका
मध्येशुद्धविज्ञानतत्परं ॥ अंगुष्टमात्रमचलंपश्येत्स्येकांतमीश्वरं
॥५१॥ रात्रौचस्थलविश्रांतिमध्येदीपंचस्थापने ॥ आठहस्तप्रमा
णेनतत्रैवअवलोकयने ॥५२॥ आवलोकनदीयस्यमध्येनीलं
चदृश्यते ॥ नीलमध्येतदापश्येदुदितंमतमुत्तमं ॥५३॥ तत्रैवप
श्यतेयेननिमिष्योन्मेषवर्जितं ॥ तदादृष्टिस्थिरोभूत्वाअंतर्ल
क्ष्यंतदुच्यते ॥५४॥ अंतर्लक्ष्यविहीनस्यबहिर्लक्ष्यंनिरर्थकं ॥

५

लक्ष्यालक्ष्यद्वयोर्लक्ष्यंलक्षितंस्वयमात्मनि॥५५॥यथावारिमरु
त्पन्नेनानाकारिविलोक्यते॥तत्रैवकल्पवासंतुविद्यनेपरिमुच्य
ते॥५६॥दृष्टिद्वयसमत्वेनगुरुर्नेत्रेचपश्यति॥ज्ञालव्यंतत्त्वदातु
र्योचित्तस्थिरमिदंभवेत्॥५७॥मीनस्नानरतःफलिःपवनभु
क्मेषस्तुपर्णान्नानो॥नैरास्यादपिचातकोप्रतिदिनेसेतबिलेमूष
कः॥भस्मोद्धूलितविग्रहाखलुखरोध्यानानुरक्तोबकःसर्वेषांफ
लमेवनास्तिसफलंज्ञानंप्रधानंतपः॥५८॥मार्गेमनुष्यमीनंच
त्रिषुलोकेषुदुर्लभं॥यःपठेत्सततंलेभत्स्यासमुक्तोभवसागरात्॥
॥५९॥अष्टांगंचचतुःपादंत्रिस्थानेपंचदैवतं॥ॐकारंयोनजा
नातिब्रह्माविष्णुशिवात्मकं॥६०॥ॐकाररपित्रूपेणगायत्रीमा

पि०

गीता

तरस्तथा॥पितामातानजानातिसविप्रश्चान्यरेतजः॥६१॥इदंती
र्थमिदंतीर्थंभ्रमंतितामसाजनाः॥आत्मतीर्थंनजानातिकथंमोक्ष
न्वरांश्रणु॥६२॥कायाकाशिकुरुक्षेत्रेआत्माविश्वेश्वरोहरिः॥ज्ञा
नभागीरथीगंगातत्रविश्रांतिलेमनः॥६३॥प्रातःप्रभृतिमा
यांतसायादिप्रांतयंतिकं॥यत्करोमिजगन्नाथतदस्तुतवपूज
नं॥६४॥मनोचित्ततुरंगाणांशरीरेरथमायते॥कालचक्रमयं
यातिपूर्वकर्मानुसारथी॥६५॥यद्दिनेपतितेबिंदुमातृगर्भेषु
निश्चितं॥तद्दिनेलिखितंसर्वंहानिस्सुखांतरं॥६६॥इतिश्री
पद्मपुराणेसिद्धांतसारेकपिलऋषिसंवादेकपिलगीतायांचतु
र्थोध्यायः॥४॥श्रीसद्गुरुनाथार्पणमस्तु॥छ॥छ॥छ॥छ॥छ॥

```
[OrderDescription]
,CREATED=03.08.19 15:24
,TRANSFERRED=2019/08/03 at 15:26:58
,PAGES=7
,TYPE=STD
,NAME=S0001285
,Book Name=M-66-KAPILGITA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,
```